# विवेकभास्करः

## संस्कृतविभागीयभित्तिपत्रिका

रामकृष्णमिशन्–विवेकानन्द–शैक्षणिक–शोधसंस्थानम्, बेलुड़मठः

उद्घाटकः - स्वामी पूर्णानन्द

निर्देशकः - डः श्रीवेङ्कटरमणभट्टः, प्राध्यापकः, संस्कृताध्ययनविभागः

सम्पादकः - श्रीउत्तमघोषः, स्नातकोत्तरद्वितीयवर्षीयः

आलङ्कारिकः - सोमनाथवर्मणः, स्नातकोत्तरतृतीयवर्षीयः

विषयः - अप्पयदीक्षितः, वर्षम्–५

प्रकाशनदिनाङ्कः – ०९.०८.२०१९, वासरः - शुक्रवासरः

# अप्पयदीक्षितः

**शास्त्रीयद्वितीयवर्षीयः सम्राट्-सामन्तः**

संस्कृतजगति अप्पय्यदीक्षितस्य नाम केनापि अश्रुतमिति नास्ति। स सदैव अस्माकं हृदि पूज्यरूपेण तिष्ठति।दक्षिणभारते तैलङ्गब्राह्मणवंशे सोऽजायत। तस्य पितुर्नाम रङ्गराजाध्वरीन्द्र इत्यासीत्।तस्य पिता अद्वैतविद्यायां पण्डितप्रकाण्डमासीत्।

**अमुं कुवलयानन्दमकरोदप्पयदीक्षितः।**
**नियोगाद् वेङ्कटपतेर्निरुपाधिकृपानिधेः।।**

श्लोकोऽयं कुवलयानन्दग्रन्थस्य अन्तिमः श्लोकः। श्लोकेऽस्मिन् अप्पय्यदीक्षितः वेङ्कटराजं तस्य आश्रयदाता इत्युक्तवान्। परन्तु विषये अस्मिन् असङ्गतिरेका उत्पद्यते, यतो हि दक्षिणभारते वेङ्कटनाम्ना द्वौ राजानौ आस्ताम्। तयोरेको विजयनगरे अपरः पेन्नाकोण्डायाम् आसीत्। एतयोर्द्वयोः वेङ्कटयोः समयः आसीत् १५८६ क्रिस्ताब्दः,किञ्च १६१३ क्रिस्ताब्दः। परन्तु द्वयोरेतयोः कः वेङ्कटः अप्पय्यदीक्षितस्य आश्रयदाता आसीत् इति विषये सदैव मतभेदो वर्तते। आफ्रेक्ट् तथा एगलिंग् इत्यानुसारम् अप्पय्यदीक्षितस्य आश्रयदाता विजयानगरस्य वेङ्कट आसीत्। परन्तु हुत्शदार्शनिकस्य मतानुसारं अप्पय्य-दीक्षितस्य आश्रय-दाता पेन्नाकोण्डायाः राजा वेङ्कटः आसीत्। शिवादित्यमणिः इति ग्रन्थे प्राप्यते यत् चिन्नबोमनामा एकः राजा अप्पय्यदीक्षितस्य पिता आसीत्। स राजा १५४९-१५६६ इत्यस्मिन् समये आसीत्। इत्थं मतभेदकारणाद् अस्माभिः वक्तुं शक्यते यत् १५४९-१६१३ इत्यस्मिन् समये अप्पय्य-दीक्षितः आसीत्। अर्थात्

षोडशशताब्द्या उत्तरार्धे स आसीत्। अप्पय्यदीक्षितस्य त्रीणि नामानि सन्ति। यथा- अप्पयदीक्षतः, अप्पदीक्षितः, अप्पय्यदीक्षितः चेति।अप्पय्यदीक्षितस्य कृतिः अप्पय्यदीक्षितः विविधेषु शास्त्रेषु महान् विद्वान् आसीत्। स शताधिकान् ग्रन्थान् विरच्य संस्कृतवाङ्मयं सुशोभितं कृतवान्। तस्य ग्रन्था अधः उपन्यस्यन्ते-

१) अद्वैतवेदान्तविषये- श्रीपरिमलः, सिद्धान्तलेशसंग्रहः, वेदान्तनक्षत्र-वादावली, मध्वमतमुखमर्दनम्, मध्वमतविध्वंसनम्, न्यायरक्षामणिः च।

२.) रामानुजमतविषये- नखमयूखमालिका, नखमयूखमालिकाव्याख्या, यादवाभ्युदयव्याख्या, पादुकारहस्यव्यख्या, वरदराजस्तवः इत्यादयः।

३) माध्वसिद्धान्तविषये- न्यायरत्नमाला, न्यायरत्नमालाव्याख्या च।

४) पूर्वमीमांसाशास्त्रविषये- नक्षत्रवादावली, विधिरसायणम्।

५) अलङ्कारशास्त्रविषये- वृत्तिवार्तिकम्, चित्रमीमांसा, कुवलयानन्दः।

***

## अप्पयदीक्षितस्य देशकालकृतीनां सामान्यपरिचयः

**शास्त्रीयतृतीयवर्षीयः देवाशिषपालः**

**भूमिका** - संस्कृतसाहित्ये कविषु मूर्धन्य आसीत् भट्टोजिदीक्षितस्य गुरुः अप्पयदीक्षितः। पण्डितप्रकाण्डं स्वनामधन्यः अप्पयदीक्षितः न केवलं वेदान्तशास्त्रे अपि च पूर्वमीमांसाशास्त्रे, भामहस्य काव्यशास्त्रपरम्परायाम् अपि सर्वोत्कृष्टो ज्योतिस्तम्भो बभूव। तस्य सर्वशास्त्रेषु महत् ज्ञानम् आसीत्। स आसीत् काव्यशास्त्री दार्शनिको वैयाकरणश्च। बहुमुखप्रतिभा-सम्पन्नः अप्पयदीक्षितः विविधविषयान् समानरूपेण प्रतिपादयितुं समर्थ आसीत्।

भारतीयकवीनां देशकालकृतीनां विषये तथ्यं सम्यक्तया न प्राप्यते यतो हि तैः स्वरचितरचनासु स्वविषये किमपि न लिख्यते स्म। अतः महाकविकालिदासवत् अस्यापि देशादिविषये पण्डितानां मतभेदास्तु सन्त्येव।

**देशवंशपरिचयः** - अप्पयदीक्षितः दक्षिणभारते श्रीमद्भरद्वाजकुले तैलङ्ग-ब्राह्मणवंशे अजायत। अनेन स्वस्य पितुः आश्रयदातुश्च नाम कुवलयानन्दग्रन्थस्य समाप्तौ लिखितम्। अस्य पिता आसीत् रङ्गराजाध्वरीन्द्रः। स अद्वैतवेदान्तशास्त्रे महान् पण्डित आसीत्। अस्य भ्रातुष्पुत्रः नीलकण्ठदीक्षितोऽपि महान् पण्डित आसीत्।

**कालपरिचयः** - श्रीमदप्पयदीक्षितस्य स्थितिकालविषये बहवो मतभेदाः सन्ति। कुवलयानन्दग्रन्थस्य अन्तिमश्लोकाद् ज्ञायते यत् अस्य आश्रायदाता आसीत् वेङ्कटराजः। परन्तु दक्षिणभारते वेङ्कटनाम्ना द्वौ राजानौ आस्ताम्। एकस्तु विजयनगरशासकः, अपरस्तु पेन्नकोण्डा-शासकः। एग्लिङ्ग् इत्यस्य मते अप्पयदीक्षितस्य आश्रायदाता विजय-नगरशासकः वेङ्कटराज आसीत्। तस्य काल आसीत् बाणनेत्रशरचन्द्र-ईशाब्द (१५३५ ई०) इति। परन्तु केचन पेन्नकोण्डाशासकः वेङ्कटराज एवास्य अश्रयदातेति कथयन्ति। अस्य कालस्तु १५८६ ई०तः १६१३ ई० पर्यन्तमासीत् इति हस्तलेखात् ज्ञायते।

पुनः, शिवादित्यमणेः पुष्पिकायाम् अप्पयदीक्षितेन चिन्नवीरपुत्रः चिन्नबोमः स्वस्य आश्रयदातृत्वेन उल्लिखितः। तस्य कालः १५४९ ई०तः १५६६ ई० पर्यन्तमासीत्। अतः एतैः प्रमाणैः तस्य कालः १५४९ ई०तः १६१३ ई० पर्यन्तमासीत् इति निर्णितो भवति। अतः अप्पयदीक्षितः प्रायः षोडशशतकोत्तरार्धे आसीत् इति विद्वद्भिः निश्चितम्।

**कृतयः** - सर्वशास्त्रविद् अप्पयदीक्षितः शताधिकग्रन्थान् विरच्य संस्कृतवाङ्मयं सुशोभितम् अकरोत्। तेन प्रायः चतुरधिकशतग्रन्था विरचिताः सन्ति। तेन्मध्ये

अद्वैतवेदान्तविषयकग्रन्था यथा– १।श्रीपरिमलः, २।सिद्धान्तलेशसंग्रहः, ३। वेदान्तलक्षत्रवादावली, ४।मध्वमतविध्वसनम् इत्यादयः। तेन तु रामानुजमतविषयकग्रन्था अपि प्रणीताः, ते यथा– १।नखमयूखमालिका, २। नखमयूखमालिकाव्याख्या, ३।वरदराजस्तत इत्यादयः प्रसिद्धा। पूर्वमीमांसाशास्त्रस्य १।नक्षत्रवादावली, २। विधिरसायनम् इति ग्रन्तद्वयं तेनैव विरचितम्। अपि च सन्ति भक्तिविषयाः षड्विंशतिः ग्रन्थाः तस्य, तेषु शिखरिणीमाला, शिवतत्त्वविवेकः, ब्रह्मतर्कस्तवः, आदित्यस्तवरत्नम्, शिवाद्वैतविनिर्णयः इत्यादयः प्रसिद्धा भवन्ति।

पुनः सन्ति अलंकारशास्त्रविषयकाः त्रयो ग्रन्था, ते च– १।वृत्तिवार्तिकम्, २।चित्रमीमांसा, ३। कुवलयानन्दश्च। परम् इयं चित्रमीमांसा पण्डितराजेन जगन्नाथेन खण्डिता। एवञ्च अप्पयदीक्षितस्य भ्रातुष्पुत्रो नीलकण्ठ -दीक्षितोऽपि जगन्नाथ-विरचितचित्र मीमांसाखण्डननामकं ग्रन्थं चित्रमीमांसादोषधिक्कारनामधेयेन ग्रन्थेन खण्डयति इति शम्॥

## श्रीमदप्पयदीक्षितस्य कृतिद्वयम्

**शास्त्रीयचतुर्थवर्षीयः हिमाद्रिशेखररायः**

मनुष्येषु वर्तते अपरिमेयं सामर्थ्यं, केचित् तत् सामर्थ्यम् आविष्कर्तुं समर्था भवन्ति, न तथा केचन। समर्थेषु पुनः केषांचित् एकिस्मिन्नेव विषये कार्ये वा आग्रहः परिलक्ष्यते, इतेरेषाम् बहुत्र। बहुमुखिप्रतिभासम्पन्नो विविधेषु शास्त्रेषु कृतभूरिपरिश्रमः श्रीमदप्पयदीक्षितः अत्र द्वितीयकोट्यन्तर्गतेषु प्रधानं स्थानम् आवहति।

पण्डितोऽयं दक्षिणभारते लब्धजनिः। पिता अस्य श्रीरङ्गराजाध्वरीन्द्रः।

प्रायः षोडशशतकस्य उत्तरार्धे श्रीमदप्पयदीक्षितो विरराज। प्रायेण पञ्चाधिकैकशतं ग्रन्थान् प्रणिनाय अयं संस्कृतवाङ्मयस्य विविधाः शाखाः सुशोभितवान्। व्याकरणे, अलंकारशास्त्रे, पूर्वमीमांसायां, माध्वसिद्धान्ते, रामानुजीयमते, भक्तिशास्त्रे, अद्वैतवेदान्ते अनेन प्रणीता ग्रन्थाः प्रमाणरूपेण अङ्गीकृता विद्वद्भिः। लघुनिबन्धेऽस्मिन् श्रीमदप्पयकृतस्य अलंकारविषयकस्य कुवलयानन्दाभिधेयग्रन्थस्य विषये, अद्वैतवेदान्ततत्त्वविभूषितस्य सिद्धान्तलेशसंग्रहनामकग्रन्थस्य च विषये आलोचनं विधीयतेऽस्माभिः।

कुवलयानन्दे लक्ष्यलक्षणसमेतानाम् अर्थालङ्काराणां विवरणं समुपलभ्यते। ग्रन्थोऽयं त्रिसप्तत्यधिकद्विशत-श्लोकात्मकः। दीक्षित-महाभागेन प्रारम्भे स्पष्टमेव उक्तं यत् जयदेवविरचिते चन्द्रालोकग्रन्थे ये अलंकाराः वर्णिताः तेषु केचन एव तत्तल्लक्ष्यलक्षणैः स्वकीये ग्रन्थे संकलिताः। येषां च विवरणं तत्र नोपलभ्यते तेषामेव लक्षणानि उदाहरणानि च स्वकल्पितानि। कविजयदेवेन केवलं कारिकाभिः एव अलंकारतत्त्वं प्रतिपादितं परन्तु श्रीमदप्पयः बोधसौकर्यार्थं कारिकाभिः साकं वृत्तीः स्वतन्त्राणि उदाहरणानि अपि विरचितवान्। श्रीमता अप्पयेन सप्तदशोत्तरैकशतमिताः अलंकाराः संकलिताः स्वकीये ग्रन्थे। तत्र शतमिता अलंकाराः सामान्याः। तेषु प्रसिद्धाः केचन, यथा उपमालंकारः, रूपकालंकारः, उत्प्रक्षालंकारः इत्यादयः; रसवदादयः सप्त, प्रमाणालंकारा अष्टौ, संसृष्टिसङ्करौ द्वौ। संकलितेषु अलंकारेषु येषां लक्ष्यलक्षणानि श्रीमता अप्पयेन कल्पितानि तेषु कश्चित् विध्यलंकारनामधेयः। तस्य लक्षणमुक्तं तेन – ‘सिद्धस्यैव विधानं यत्तामाहुर्विध्यलंकृतिम्’ इति अर्थात् लोकविज्ञातस्यैव विषयस्य पुनः विधानमिति, यथा - ‘पञ्चमोदञ्चने काले कोकिलः कोकिलो भवेत्’ इति। अस्य अर्थस्तावत् पञ्चमस्वरप्रकटनकाले एव काककोकिलयोः भेदः अवगम्यते। नोचेत्

सामान्यतया काककोकिलयोर्न भेदः। इत्थं कुवलयानन्दात् काव्यशास्त्रेषु श्रीमदप्पयस्य पाण्डित्यं प्रतिफलति।

प्रायेण जनाः भक्तिमन्तश्चेत् विचारशीलो न भवन्ति, एष तु श्रीमदप्पयदीक्षितो यथा भक्तिमान् तथैव विचारशीलोऽपि। तस्य निदर्शनस्वरूप एव तत्कृतः सिद्धान्तलेशसंग्रहः। एष ग्रन्थः अद्वैतवेदान्तसम्प्रदाये सुप्रसिद्धो वर्तते। आचार्यश्रीशङ्करात् परवर्तिनः अद्वैताचार्या यद्यपि शाङ्करेण मतेन सम्मता आसन्, तथापि तेषु मतानैक्यस्य आधिक्यं दरीदृश्यमानम् आसीत्। यथा कश्चित् अद्वैती जीवस्य एकत्वं स्वीकरोति, अपरश्च अनेकत्वम्। कश्चित् मन्यते जीव एव प्रतिबिम्बः, कश्चिच्च ईश्वर एव प्रतिबिम्ब इत्येवं बहुधा मतभेदः दृश्यते स्म। दीक्षितमहाभागः तेषां मतानां मूलशाङ्करमते समन्वयार्थं विरचितवान् इमं ग्रन्थम्। परिच्छेदचतुष्टयात्मकोऽयं ग्रन्थः। तत्र प्रथमे परिच्छेदे आदौ श्रवण-मनन-निदिध्यासनादिषु विध्यनपेक्षत्वं प्रतिपाद्य ब्रह्मणः जगज्जन्मस्थितिलय -कारणत्वरूपस्य लक्षणस्य विचारः प्रस्तुतः। ततः जीवेश्वरयोः स्वरूपवर्णनं समुपलभ्यते, विशिष्य जीवस्य एकानेकत्वविचारः अल्पज्ञत्वविचारः, ईश्वरस्य च सर्वज्ञत्वविचारः दृश्यते। यद्यपि अत्र विशेषतः परमतसंग्रहः एव दृश्यते तथापि तत्र तत्र स्थलेषु ग्रन्थकारेण स्वप्रतिभया तस्य मतस्य वर्णनमपि विहितम्। यथा विधिवादे श्रवणादौ न कोऽपि विधिरिति ग्रन्थकारस्यैव अभिमतम्। एवं यद्यपि मतानैक्यं दृश्यते तथापि तानि मतानि अद्वितीये ब्रह्मणि तात्पर्येण समन्वितानि इति दर्शितानि। द्वितीये च परिच्छेदे अद्वितीये ब्रह्मणि कथं वेदान्तानां समन्वयः इति मानान्तरविरोधमाशङ्क्य तत्परिहरति 'न, आरम्भणाधिकरणोदाहृतश्रुतियुक्तिभिः प्रत्यक्षाद्यधिगमस्य प्रपञ्चस्य ब्रह्मविवर्ततया मिथ्यात्वावगमात्' इति। तत्र पुनः अन्यमतोपस्थापनेन एकैकस्य विरुद्धवादस्य खण्डनं कृतं श्रीमदप्पयेन। अत्र

स्वाप्निकाध्यासविषये ग्रन्थकारेणोक्तं स्वाप्नाध्यासः अपि प्रातिभासिकः इति। तृतीये परिच्छेदे ज्ञानेनैव ब्रह्मप्राप्तिः न तु कर्मभिरिति प्रतिपादितम्। अन्तिमे च चतुर्थपरिच्छेदे अविद्यालेशविषये अद्वैताचार्याणाम् मतानि संगृहीतानि। इत्थं सिद्धान्तलेशसंग्रहात् तस्य दर्शनशास्त्रेषु नैपुण्यमवगम्यते॥

***

अप्पयदीक्षितः

**शास्त्रीयचतुर्थवर्षीयः मिलनमालिकः**

**आरातो मित्रता यस्य समादृष्टिर्हरौ हरे ।**
**आजीवनं समातिष्ठत् तं वन्देऽप्पयदीक्षितम् ।।**

संस्कृतवाङ्मये अद्वैतविद्याचार्यः पण्डितः अप्पयदीक्षितः । सः दक्षिणभारते जन्म अलभत । भारद्वाजगोत्रोत्पन्नः काञ्च्या निकटे 'अडप्पल' ग्रामनिवासी वक्षःस्थलाचार्यापरसंज्ञकस्य आचार्यदीक्षितस्य पौत्रः रङ्गराजाध्वरिणःपुत्रः महामनीषी अप्पयदीक्षितः। सः द्वासप्ततिवर्षपर्यन्तं जीवितः सन् शताधिकान् ग्रन्थान् रचयामास । अयं अप्पयदीक्षितः स्वपितुः रङ्गराजाध्वरिणःसकाशादेव सर्वविद्यां जग्राह । तेन विरचितेषु ग्रन्थेषु वृत्तिवार्तिकम्, चित्रमीमांसा , कुवलयानन्दश्चेति ग्रन्थत्रयम् अलङ्कारशास्त्रविषयकम्। तत्र कुवलयानन्दो ग्रन्थः पीयूषवर्षकृतश्चन्द्रा-लोकालङ्कारप्रकरणस्य व्याख्यरूप एव ।

समाजे सर्वत्र 'अप्पयदीक्षितः' इत्यनेन नाम्ना एव तस्य प्रसिद्धिः वर्तते। किन्तु तदीयं वास्तविकं श्रीपितृचरणकृतं समन्त्रकं नाम तु 'विनायकसुब्रह्मण्यः'

इत्येवासीत् यथा साम्मतं दृश्यते लोके यद् मातृपितृस्वसृप्रभृतयो ज्यायांसो जनाः वात्सल्यातिरेकेण शिशुं लालितकनाम्ना आह्वयन्ति ,तथैव पुरापि श्रीरङ्गराजाध्वरी स्नेहातिशयेन एनं श्रीअप्पयदीक्षितमहोदयम् 'अप्प' इति नाम्ना एव आह्वयितुम् आरेभे । यद्यपि 'अप्पय-अप्पय्य'-शब्दापेक्षया अप्पशब्द एव शुद्धोऽस्ति, श्रीदीक्षितमहोदयेनापि आत्मनः कृते अस्य नाम्नः प्रयोगो कृतोऽस्ति , तथापि तदीयम् 'अप्पदीक्षितः' इति नाम 'विनायकसुब्रह्मण्यः' इति अपरनाम इव लोकेऽनुच्यमानमेव लभ्यते । लोके तु 'अप्पयदीक्षितः' अप्पय्यदीक्षितश्चेति उभे नामनी प्रचारमापतुः।

श्रीमदप्पयदीक्षितमहोदयस्य प्रारम्भिकी शिक्षा तदीयपितृचरणच्छायायाम् एवाभवत्। तदीयेन पित्रा श्रीरङ्गराजाध्वरिणा एव अस्मै मातृकाक्षराणि पाठितान्यासन् ।यदायं वर्णपरिचये शब्दपरिचये तदर्थज्ञाने च कुशलो बभूव, तदा श्रीरङ्गराजाध्वरी अमुं स्वपुत्रं समीपवर्तिनि 'मुल्लङ्ग'नामनि ग्रामे निवासिनो विद्वत्कविकुलकमलरवेः श्रीगुरुराम-कवेश्चरणयोः पाठनाय समर्पयामास। श्रीगुरुरामकविना महता स्नेहेन, भूयसा वात्सल्येन च अयं पाठितः। गुरुशिष्यचोः परमा प्रीतिः आसीत्। श्रीरङ्गराजाध्वरी एकस्मिन् शुभे मुहूर्ते ज्येष्ठात्मजं श्रीदीक्षितं श्रौतेन विधिना उपनीय शिक्षा-व्याकरण-कल्प-निरुक्त-ज्यौतिष-च्छन्दोयुतां त्रयीं पाठयितुम् आरेभे। श्रीदीक्षितमहोदयः श्रीगुरुचरणसकाशादिव श्रीपितृचरण-सकाशादेव समस्तवैदिकवाङ्मय-वैभवं, समस्तञ्च औपनिषदं तत्त्वम् अधीतवान्। श्रीदीक्षितस्य मनोभूमौ स्वीयपितृचरण-कमलयोः कृते परमोत्कृष्टा गुरुभावना आसीत्। एवं पितृत्वं गुरुत्वं च उभयं मिलित्वा तच्चित्ते श्रद्धा सर्वदा विद्यमाना आसीत्। शिष्यीभूतपुत्रोत्कर्षे एव आत्मोत्कर्षं मन्यमानः स परां प्रीतिं जगाम।

**अप्पयदीक्षितस्य सुप्रथिताः कृतयः**

संस्कृतवाङ्मये विविधेषु शास्त्रेषु निष्णातोऽयं विद्वान् प्रायशः शतसंख्यकान् ग्रन्थान् रचयामास। तेषु सुप्रसिद्धाः वर्तन्ते - अद्वैतवेदान्त-विषयकः श्रीपरिमलः, सिद्धान्तलेशसंग्रहश्चेति, रामानुजमतविषयको ग्रन्थः 'नखमयूखमालिका' इति, माध्वसिद्धान्तविषयको ग्रन्थः 'न्यायरत्नमाला' इति, पूर्वमीमांसाविषयको ग्रन्थः 'नक्षत्रवादावली' इति, व्याकरणविषयकः ग्रन्थः 'नक्षत्रवादावली' इति, भक्तविषयकः 'शिखरिणीमाला' इत्येते। अलंकारशास्त्रविषये तु 'वृत्तिवार्तिकं', 'चित्रमीमांसा', 'कुवलयानन्दः' इति त्रयो ग्रन्थाः सुप्रसिद्धा एव। कुवलयानन्दनामकः ग्रन्थः संस्कृतालंकारसाहित्ये अन्यतमत्वं भजते।

एवंविधः श्रीमदप्पयदीक्षितः संस्कृतसाहित्येतिहासे विविधेषु शास्त्रेषु स्वकृतिभिः अविस्मरणीय एव॥

## आलङ्कारिकः अप्पय्यदीक्षितः

**शास्त्रीयपञ्चमवर्षीयः राजकुमारमण्डलः**

संस्कृतजगति अप्पय्यदीक्षितः बहुविषयज्ञः प्रौढपण्डितश्च। वेदान्तशास्त्रे अलंकारशास्त्रे चास्य महदवदानं वर्तते। अलंकारशास्त्रे अप्पय्यदीक्षितस्य अवदानमत्र विशदीक्रियते।

व्युत्पत्तिभेदेन अलंकारशास्त्रस्य प्रयोगः द्विधा दृश्यते। भावार्थे क्तिन्प्रत्यये अलंकृतिरलंकारः इति व्युत्पत्त्या साहित्यशास्त्रमेव अलंकारशास्त्रम्। अलङ्क्रियते अनेन इति व्युत्पत्त्या साहित्यशास्त्राङ्गभूता उपमाद्यलंकारा गृह्यन्ते।प्रकृते उपमाद्यलंकारशास्त्रे अप्पय्यदीक्षितस्य अवदानं प्रकटीक्रियते। मम्मटाचार्येण अलङ्कारस्य लक्षणप्रसङ्गे उक्तम्-

**"उपकुर्वन्ति तं सन्तं येङ्गद्वारेण जातुचित्।**
**हारादिवदलंकारस्तनुप्रासोपमादयः।।"इति।**

इतिहासज्ञानपूर्वकमेव विषयस्य पूर्णज्ञानं सम्भवति। तस्मात् प्रकृते उपमाद्यलंकाराणामितिहासः सामान्यतया उच्यते। वस्तुतः भारतीयचिन्तनधारायाः मूलप्रवाहः वेदे एव दृश्यते। उपमाद्यलंकाराणां परिचयः आदौ वेदे प्राप्तः। 'उत त्वः पश्यन्न ददर्श वाच'मित्यादिमन्त्रे उपमायाः प्रयोगः दृष्टः। 'द्वा सूपर्णा सयुजा सखा'येत्यादिमन्त्रे उत्प्रेक्षायाः प्रयोगः वर्तते। एवं निरुक्ते उपमायाः स्वरूपमपि प्रदत्तं-'यदतत् तत्सदृशं तदासां कर्मेति गार्ग्यः' इति। परम्परेयं भरताद्याचार्यैः प्रसारिता विद्यते।

अप्पय्यदीक्षितः साहित्यशास्त्रे त्रीन् ग्रन्थान् व्यरचयत्। वृत्तिवार्तिकं,चित्रमीमांसा,कुवलयानन्दश्चेति अस्य त्रयः ग्रन्थाः। एषु उपमाद्यलंकारशास्त्रविषयकं ग्रन्थद्वयं तावत्-चित्रमीमांसा कुवलयानन्दशचेति।

चित्रमीमांसाग्रन्थे अलंकाराणां विषये महती चर्चा कृता वर्तते। कुवलयानन्दग्रन्थे श्लेषार्थान्तरन्यासाद्यलंकाराणाम् आलोचनाप्रसङ्गे चित्रमीमांसायां विशदीक्रियत इत्युक्तम्। किन्तु चित्रमीमांसायामेतेषामालोचना नास्ति। अतिशयोक्त्य-लंकारपर्यन्तं द्वादशालंकारैरेव ग्रन्थस्य समाप्तिः जाता। द्वादशालङ्कारास्तावत्- उपमा, उपमेयोपमा, अनन्वयः, स्मरणं, रूपकं, परिणामः, ससन्देहः,भ्रान्तिमान्, उल्लेखः, अपह्नुतिः, उत्प्रेक्षा, अतिशयोक्तिश्चेति। अस्य ग्रन्थस्य अपूर्णता स्वयम् अप्पय्यदीक्षितैरेव वर्णिता-

**"अप्यर्धचित्रमीमांसा न मुदे कस्य मांसला।**
**अनूरुरिव धर्मांशोरर्धेन्दुरिव धुर्जटेः।।"इति।**

कुवलयानन्दग्रन्थे केवलमर्थालंकाराणामालोचना विद्यते। ग्रन्थस्यास्य रचनायाः आधारः जयदेवविरचितचन्द्रालोकाख्यग्रन्थस्य पञ्चममयूखः। चन्द्रालोके विद्यमानाः अलंकाराः प्रायः अस्मिन् ग्रन्थे चर्चिताः।तदुक्तं-

**"येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः।**
**प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यन्ते।।"इति।।**

एवम् अलङ्कारशास्त्रे आचार्यस्य अप्पयदीक्षितस्य महदवदानं वर्तते।

***

## अप्पयदीक्षितस्य कृतयः तद्वैशिष्ट्यञ्च

**तुहिनमण्डलः, आचार्यद्वितीयवर्षीयः**

अप्पयदीक्षितः संस्कृतजगति एकः बहुविश्रुतः बहुविषयज्ञः श्रेष्ठपण्डितरूपेण प्रतिष्ठितः। विविधविषयेषु गभीरप्रतिभां धारयतः सर्वशास्त्रेषु च सुष्ठुप्रतिपादनशक्तिशालिनः अस्य सुपण्डितस्य संस्कृतक्षेत्रे अवदानम् अविस्मरणीयम्। प्रायः चतुरधिकैकशतग्रन्थान् विरच्य अयं सर्वशास्त्रनिष्णातः संस्कृतवाङ्मयस्य नैकाः शाखाः सुशोभितवान्। मीमांसकोऽप्यसौ वेदान्तविषयकान् व्याकरणविषयकान् अलङ्कार-विषयकान् च बहून् ग्रन्थान् रचितवान्। अस्य कृतिषु अद्वैत-द्वैत-विशिष्टाद्वैतनामकान् वेदान्तस्य त्रीनपि प्रकारान् आश्रित्य ग्रन्थाः उपलभ्यन्ते। तत्र अद्वैतवेदान्तविषयकाः षट् ग्रन्थाः यथाक्रमं- श्रीपरिमलः,

सिद्धान्तलेशसंग्रहः, वेदान्तनक्षत्रवादावली, मध्वतन्त्रमुख-मर्दनम्, मध्वमतविध्वंसनम्, न्यायरक्षामणिः चेति। अत्र इतरवादिनां मतखण्डनपुरःसरम् अद्वैतवेदान्तस्य

सिद्धान्ताः एव प्रतिपादिताः। अप्पयदीक्षितस्य कृतिषु सिद्धान्तलेशसंग्रहः इति बहुप्रसिद्धः ग्रन्थः। अत्र मूलतः अद्वैतवेदान्तस्य भामती-वार्तिक-विवरणादिसम्प्रदायानां यानि मतानि सन्ति तान्येव सङ्कलितानि। यद्यपि अत्र प्रकाशिताः विषयाः वेदान्तिनां विदुषां चिराभ्यस्ताः सुपरिचिताः एव तथापि यथा चिरपरिचितस्य चिरावलोकितस्यापि सहकारपादपस्य काचिदपूर्वैव जायते कुसुमफलसमृद्धिर्वसन्तागमे, तथैव श्रीमदप्पयदीक्षितोपज्ञे सिद्धान्तलेश-संग्रहेऽस्मिन् पूर्वपूर्वतराचार्यमतसमालोचनजनितानवद्य-सङ्कलनात्मके ग्रन्थे समवलोक्यते काचिदपूर्वैव विचारणपद्धतिः।

रामानुजमतविषयकाः पञ्च ग्रन्थाः सन्ति। यथा- नखमयूख-मालिका, नखमयूखमालिकाव्याख्या, वेदान्तदेशिकेन विरचितस्य यादवाभ्युदयस्य व्याख्या, पादुकारहस्यम् इति ग्रन्थस्य व्याख्या, वरदराजस्तवः इति च।

माध्वसिद्धान्तानुसारि ग्रन्थद्वयं विद्यते। यथा- नक्षत्रवादावली, विधिरसायनम् चेति। ग्रन्थद्वयेऽस्मिन् मुख्यवैशिष्ट्यं तावद् अत्र द्वैतमतं प्रतिष्ठापितम्। अर्थात् ब्रह्म अपि सत्, जगदपि सत् इति।

व्याकरणविषयकं ग्रन्थमेकं तेन विरचितम्। तद्धि- नक्षत्रवादावली इति।

भक्तिविषयककृतयः षड्विंशतिः सन्ति। तेषु शिखरिणीमाला, शिवतत्त्वविवेकः, ब्रह्मतर्कस्तवः, लघुविवरणम्, आदित्यस्तवरत्नम्, आदित्यस्तवव्याख्या इत्यादयः प्रसिद्धाः। एतेषु कृतिषु भगवतः स्तुतिः, गुणमहिमकीर्तनं च विहितम्।

अलङ्कारशास्त्रविषयकाः त्रयः ग्रन्थाः लभ्यन्ते। ते च वृत्तिवार्तिकः, चित्रमीमांसा, कुवलयानन्दश्च। एतेषु वृत्तिवार्तिक इति नाम्ना एव ज्ञायते यत् अत्र वृत्तिविषयकचर्चा विहिता। परन्तु अत्र अभिधा लक्षणा इति वृत्तिद्वयमेव आलोचितम्। व्यञ्जनाविषये कापि चर्चा न प्राप्यते। अतः ग्रन्थोऽयम् असम्पूर्णमिति केचिद्वदन्ति। किन्तु ग्रन्थस्यास्य अपूर्णताविषये दीक्षितस्य किमपि वचनं न प्राप्यते। तस्य चित्रमीमांसा इति ग्रन्थोऽपि असम्पूर्णः। तत्तु दीक्षितेन स्वयमेवोक्तं ग्रन्थस्यान्ते। विशदविवेचनात्मकेऽस्मिन् ग्रन्थे केवलं द्वादश एव अलङ्काराः विशदेन प्रतिपादिताः। ते च यथाक्रमम्- उपमा, उपमेयोपमा, अनन्वयः, स्मरणम्, रूपकम्, परिणामः, ससन्देहः, भ्रान्तिमान, उल्लेखः, अपह्नुतिः, उत्प्रेक्षा, अतिशयोक्तिश्च। दीक्षितस्य अपरः ग्रन्थः अस्ति कुवलयानन्दः। अलङ्कारशास्त्रेषु ग्रन्थोऽयं बहुप्रसिद्धः महत्त्वपूर्णश्च। अत्र केवलम् अर्थालङ्कारविषये एव आलोचनं विहितम्। जयदेवविरचितः चन्द्रालोकः अस्ति अस्य ग्रन्थस्य मूलाधारः। चन्द्रालोके यथा लक्ष्यलक्षणरूपेण अलङ्काराः प्रतिपादिताः तथैव अत्रापि स एव मार्गः अनुसृतः। परन्तु अत्रेदं वैशिष्ट्यं यत्- चन्द्रालोके केवलं कारिकया एव लक्षणमुदाहरणञ्च वर्णितं परन्तु अत्र कारिकाणाम् आशयं स्पष्टीकरणाय कारिकया सह स्वयं वृत्तिः अपि रचिता। कुवलयानन्दः अधीयते चेत् अप्पयदीक्षितस्य पाण्डित्यं ज्ञातुं शक्यते। अतः ग्रन्थोऽयम उच्चकोटिग्रन्थेषु परिगण्यते इति शम्।

***

**सम्पादकीयम्**

तार्किका घटपटेति रटेयुः
शाब्दिकाः खफछठेति पठेयुः।
मादृशां तु सततं स्मरणियौ
चन्द्रचूडचरणौ रमणीयौ।।

संस्कृतजगति स्वप्रतिभया मूर्धन्यतां प्राप्तेषु अङ्गुलिगण्येषु विद्वत्प्रकाण्डेषु अन्यतमोऽयं कविः अप्पयदीक्षितः। षोडशशतकस्य उत्तरार्धे दक्षिणभारते तैलङ्गब्राह्मणवंशे लब्धजनिः श्रीरङ्गराजाध्वरीन्द्रपुत्रोऽयं भट्टोजिदीक्षितस्य गुरुरासीत्। अप्प अप्पय अप्पय्य विनायकसुब्रह्मण्य- इत्यादीनि तस्यैव नामान्तराणि। वस्तुतो मीमांसकोऽप्यसौ सर्वविद्यापारङ्गतः सर्वशास्त्रनिष्णातः स्वकीय-चतुरधिकैकशतग्रन्थकुसुमैः संस्कृतवाङ्मयं सज्जीचकार। अद्वैत-वेदान्तालङ्कारादिशास्त्रेषु तदीयकृतय एव प्रमाणत्वेन आश्रियन्ते विद्वत्तल्लजैः। वेदान्ते तस्य सिद्धान्तलेशसङ्ग्रहः पुनश्च अलङ्कारे कुवलयानन्दः तदीयविचारवैभवस्य अनवद्यविचारपद्धतेश्च परां काष्ठां द्योतयति। कुवलयानन्दे लक्ष्यलक्षणसमेतानाम् अर्थालङ्काराणां वर्णनेन सह वृत्तीः स्वकीयान्युदाहरणान्यपि व्यरचयत् अयमप्पयदीक्षितः। विद्वन्मूर्धन्यमूर्धन्यस्य अप्पयदीक्षितस्य विषये तदिदमस्माकं क्षुद्रं निवेदनं सहृदयहृदयाह्लादं जनयतु इति सिद्धेश्वरं सदाशिवं सम्प्रार्थ्य विरम्यते।